योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः १९

एकोनविंशः सर्गः १९

श्रीवसिष्ठ उवाच ।

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।

भ्रात्रोस्त्रिपथगातीरे संवादं मुनिपुत्रयोः ।। १

अयं बन्धुरयं नेति कथाप्रस्तावतः स्मृतम् ।

इतिहासमिमं पुण्यमाश्चर्यं श्रृणु राघव ।। २

अस्त्यस्य जम्बूद्वीपस्य कस्मिंश्चिद्गिरिकुञ्जके ।

वनव्यूहमहोत्तंसो महेन्द्रो नाम पर्वतः ।। ३

कल्पद्रुमवनच्छायाविश्रान्तमुनिकिन्नरः ।

श्रृङ्गैराततमाकाशं जितवान्यः समुन्नतैः ।। ४

ब्रह्मलोकान्तरप्राप्तश्रृङ्गकन्दरचारिभिः ।

सामवेदप्रतिध्वानघुंघुमैर्गायतीव यः ।। ५

यः पयोमेदुरैर्मेघैर्लसितैः श्रृङ्गकोटिषु ।

लताकुसुमसंप्रोतैः कुन्तलैरिव राजते ।। ६

यस्तदोड्डयनोत्कानां शरभाणां विजृम्भितैः ।

विस्फूर्जति गुहावक्त्रैः कल्पाभ्राणि हसन्निव ।। ७

येन निर्झरनिर्ह्रादैः कन्दरान्तरचारिभिः ।

समुद्रजलकल्लोलविलासो विजितोऽभितः ।। ८

तस्यैकदेशे वितते रत्नसानौ मनोरमे ।

मुनिभिः स्नानपानार्थं व्योमगङ्गावतारिता ।। ९

तस्यास्त्रिपथगायास्तु तीरे विकसितद्रुमे ।

रत्नाद्रितटविद्योते कचत्कनकपिञ्जरे ।। १०

आसीदभ्युदितज्ञानस्तपोराशिरुदारधीः ।

मुनिर्दीर्घतपा नाम तपो मूर्तमिवापरम् ।। ११

मुनेर्बभूवतुस्तस्य पुत्रौ द्वाविन्दुसुन्दरौ ।

पुण्यपावननामानौ द्वौ कचाविव वाक्पतेः ।। १२

स ताभ्यां सह पुत्राभ्यां भार्यया च सहैकया ।

उवास सरितस्तीरे तस्मिन्सफलपादपे ।। १३

अथ काले तयोस्तस्य पुत्रयोर्ज्ञानवानभूत् ।

पुण्यो नाम च यो ज्येष्ठो गुणज्येष्ठश्च राघव ।। १४

पावनोर्धप्रबुद्धोऽभूत्पूर्वसंध्याम्बुजं यथा ।

मौर्ख्यादधिगतो नाप्तः पदे दोलायितः स्थितः ।। १५

ततो वहत्यकलिते काले कलितकारणे ।

संवत्सरशते जीर्णदीर्घदेहलतायुषि ।। १६

अस्माद्भङ्गुरभूताढ्याद्वृत्तान्तशतभीषणात् ।

रतिमुत्सृज्य संसाराज्जराजर्जरजीवितः ।। १७

कलनापक्षिणी नीडं देहं दीर्घतपा मुनिः ।

जहौ गिरिगुहागेहे भारं वैवधिको यथा ।। १८

प्रशान्तकलनारम्भं चेत्यरिक्तचिदास्पदम् ।

पदं जगाम नीरागं पुष्पगन्ध इवाम्बरम् ।। १९

अथ भार्या मुनेर्देहं प्राणापानविवर्जितम् ।

दृष्ट्वा विलुलितं भूमौ विनालमिव पङ्कजम् ।। २०

चिरमभ्यस्तया योगयुक्त्या पतिवितीर्णया ।

तत्याज तनुमम्लानां षट्पदी पद्मिनीमिव ।। २१

भर्तारमेवानुययौ जनस्यादृष्टतां गता ।

प्रभागगनकोशस्थमस्तं यातमिवोडुपम् ।। २२

मातापित्रोस्तु गतयोरौर्ध्वदेहिककर्मणि ।

पुण्य एव स्थितोऽव्यग्रः पावनो दुःखमाययौ ।। २३

शोकोपहतचित्तोऽसो भ्रमन्काननवीथिषु ।

ज्यायांसमनवेक्ष्यैव पावनो विललाप ह ।। २४

अथौर्ध्वदेहिकं कृत्वा मातापित्रोरुदारधीः ।

आययौ विपिने पुण्यः पावनं शोकलालसम् ।। २५

पुण्य उवाच ।

किं पुत्र घनतां शोकं नयस्यान्ध्यैककारणम् ।

वाष्पधाराधरं घोरं प्रावट्काल इवाम्बुजम् ।। २६

पिता तव महाप्राज्ञ गतः सार्धं त्वदम्बया ।

स्वामेव परमात्मात्मपदवीं मोक्षनामिकाम् ।। २७

तत्स्थानं सर्वजन्तूनां तद्रूपं विजितात्मनाम् ।

स्वभावमभिसंपन्ने किं पितर्यनुशोचसि ।। २८

ईदृशी तु त्वया बद्धा भावनेह विमोहजा ।

संसारे यदशोच्योऽपि त्वया तातोनुशोच्यते ।। २९

न सैव भवतो माता नासावेव पिता तव ।

न भवानेष तनयस्तयोर्निःसंख्यपुत्रयोः ।। ३०

मातापितृसहस्राणि समतीतानि ते सुत ।

बहून्यम्बुप्रवाहस्य निम्नानीव वने वने ।। ३१

असंख्यपुत्रयोर्नैव भवानेव सुतस्तयोः ।

सरित्तरङ्गवत्पुत्र गताः पुत्रगणा नृणाम् ।। ३२

अस्मत्पित्रोरतीतानि पुत्रलक्षाण्यनेकशः ।

पत्रकोरकवृन्तानि लताविटपयोरिव ।। ३३

मित्रबान्धववृन्दानि जन्तोर्जन्मनि जन्मनि ।

ऋतावृतावतीतानि फलानीव महातरोः ।। ३४

शोचनीया यदि स्नेहान्मातापितृसुताः सुत ।

तदतीता न शोच्यन्ते किमजस्रं सहस्रशः ।। ३५

प्रपञ्चोऽयं महाभाग दृश्यते जागते भ्रमे ।

परमार्थेन ते प्राज्ञ नास्ति मित्रं न बान्धवाः ।। ३६

न नाश इव हि भ्रातः परमार्थेन विद्यते ।

महत्यपि चिरातप्ते मराविव पयोलवाः ।। ३७

एता याः प्रेक्षसे लक्ष्मीश्छत्रचामरचञ्चलाः ।

स्वप्न एव महाबुद्धे दिनानि त्रीणि पञ्च वा ।। ३८

दृष्ट्या तु पारमार्थिक्या पुत्र सत्यं विचारय ।

नैव त्वं न वयं चैव भ्रान्तिमन्तः परित्यज ।। ३९

अयं गतो मृतश्चायमिति दुर्दृष्टयः पुरः ।

स्वसंकल्पोपतापोत्था दृश्यन्ते नतु सत्यतः ।। ४०

अज्ञानविस्तीर्णमरौ विलोलं

शुभाशुभस्यन्दमयैस्तरङ्गैः ।

सवासनानाममरीचिवारि

परिस्फुरत्येतदनन्तरूपम् ।। ४१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषूपशमप्रकरणे पावनबोधनं नामैकोनविशः सर्गः ।। १९ ।।